श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री दिव्याष्टोत्तरशतनामावलिः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री दिव्याष्टोत्तरशतनामावलिः ॥

यस्याभवत्भक्तजनार्तिहन्तुः
    पितृत्वमन्येष्वविचार्य तूर्णम्।
स्तम्भेऽवतारस्तमनन्यलभ्यं
    लक्ष्मीनृसिंहं शरणं प्रपद्ये॥

यो नित्यमच्युतपदाम्बुजयुग्मरुक्म -
    व्यामोहतस्तदितराणि तृणाय मेने।
अस्मद्गुरोर्भगवतोऽस्य दयैकसिन्धोः
    रामानुजस्य चरणौ शरणं प्रपद्ये॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीमद्रङ्गशठारिसंयमिवराल्लब्धागमान्तद्वयं
    श्रीमद्वीररधूद्वहाद्यशठजित् पादारविन्दाश्रयम्।
श्रीमद्वेदवतंसदेशिकयतेः कारुण्यवीक्षास्पदं
    सेवे रङ्गधुरीणशासनवशं नारायणं योगिनम्॥

नारायण इति चत्वारि अक्षराणि।
शठकोप इति चैव तथैव।
एतेन नारायणशठकोप इति अष्टाक्षराभिधानेनालङ्कृताः
श्रीमदहोबिलपीठाधीशाः अष्ट यतीन्द्राः।
तेष्वष्टमाः अस्मदाचार्याः देवकीवसुदेवाष्टमसन्तति -
सदृशपूर्वाश्रमनामयुक्ताः श्रीकृष्णवत् जगतां गुरवः

नारायणार्यानुजाः श्रीवण्शठारयः
श्रीनारसिंहदिव्यमणिपादुकासेवकाग्रमणयः
श्रीनारायणशठकोपयतीन्द्रमहादेशिकाः।
अस्मदाचार्यसार्वभौमानां शताभिषेकमहोत्सवस्वस्त्यवसरे
भक्तेभ्यः अष्टैश्वर्याष्टभोगं अष्टदिक्ख्यातिं च अधुना दत्त्वा
अष्टाक्षराद्युपदेशमहिम्ना अन्ततः परमपदप्राप्तियोग्यतां
अनुगृह्णति निरवधि करुणामृतस्यन्दिनि
अस्मद्गुरुपदाम्बुजयुगळे सविनयं पार्थसारथिसूनुना
देशिकशर्मणा दासेन समर्पितं
अष्टातीतशतदिव्यदेशविलसदर्चानारायणगद्यरूपं
दिव्याष्टोत्तरशतम्।
तद्गद्यमनुसृत्य सङ्कलिता एषा दिव्यनामावलिः॥

भूतभव्यभवन्नाथ ! भूतवेताळपुष्करैः।
भौमनीळाभट्टनाथपरकालमुनिधृतैः॥

भक्तिसारवंशमौळिभक्ताङ्घ्रिपदरेणुकैः।
गीतस्त्वं शठकोपेन स्तुतेन स्निग्धवाणिना॥

द्वादशैः सूरिभिर्दिव्यैः प्रबद्धं निगमापरम्।
दिव्यदेशेषु देवेश ! तवार्चासंभवं स्मरन्॥

| | |
|---|---|
| 1 | ओं सह्यजामध्यसंभूतश्रीरङ्गभुजगेशयाय नमः |
| 2 | ओं फाल्गुने पूर्वफल्गुन्यां चोळकन्योद्वहप्रियाय नमः |
| 3 | ओं उरगे कदम्बनिलये निषण्णपुरुषोत्तमाय नमः |
| 4 | ओं वेदपर्वतसंपन्नपुण्डरीकायतेक्षणाय नमः |

| | |
|---|---|
| **5** | ओं प्रेमगेहनिवासार्हसुन्दराकृतिभूपतये नमः |
| **6** | ओं प्रार्थितार्तिविनिर्मूलभक्ष्यकुंभकरान्विताय नमः |
| **7** | ओं खण्डीपुरकपालिस्थदोषहारिदयानिधये नमः |
| **8** | ओं सङ्गमक्षेत्रविख्यातजगद्रक्षणकारकाय नमः |
| **9** | ओं कृष्णारण्यकपिस्थानगजेन्द्राभयदायकाय नमः |
| **10** | ओं जटायुमुक्तिसन्तृप्तभुजङ्गशयराघवाय नमः |
| **11** | ओं उत्पन्नधान्यसंभारमापनाऽऽसक्तमाधवाय नमः |
| **12** | ओं अपर्याप्तामृताकारचक्रशार्ङ्गधराधिपाय नमः |
| **13** | ओं अवनीभुजसंयोगादनन्यसमवैभवाय नमः |
| **14** | ओं श्रीवासवासुदेवाख्यवञ्जुळाभाग्यकञ्चुकाय नमः |
| **15** | ओं नायकीपञ्चसंयुक्तवेदसारमहाविभवे नमः |
| **16** | ओं कृष्णमङ्गळसञ्चारिभक्तवत्सलकेशवाय नमः |
| **17** | ओं पञ्चकृष्णपुरासन्नशौरिराजाय महाऽसिताय नमः |
| **18** | ओं पुराणवकुळामोदकाळमेघाय महीपतये नमः |
| **19** | ओं नागवन्द्यनीलमेघसुन्दराङ्गगदाधराय नमः |
| **20** | ओं तञ्चकगजान्तकाधिभञ्जकवरदायकाय नमः |
| **21** | ओं नन्दीपुरचंपकवल्लीनायकाय जगत्पतये नमः |
| **22** | ओं शुक्रतीर्थतटारामशृङ्गारमुखसुन्दराय नमः |

| | |
|---|---|
| 23 | ओं वत्सवात्सल्यसन्दिग्धदेवाधिराजगोसखाय नमः |
| 24 | ओं व्याघ्राङ्घ्रिसेवितासीमदयाकल्लोलसागराय नमः |
| 25 | ओं पर्यङ्कशङ्खसंयोगव्योमज्योतिविलक्षणाय नमः |
| 26 | ओं कावेरीजाह्नवीसेव्यसुगन्धवननायकाय नमः |
| 27 | ओं रुक्मिण्या भामया युक्तोऽप्यत्यक्तगोपवेषकाय नमः |
| 28 | ओं शीर्काळ्यां सव्यपादेन विश्वविक्रान्तिसाधकाय नमः |
| 29 | ओं कुम्भनाट्यवेषधारिवासुदेवचतुर्भुजाय नमः |
| 30 | ओं पुरुषोत्तमनायिकासदृशोत्तमपौरुषाय नमः |
| 31 | ओं रुद्रसहवासरतसुवर्णवरदायकाय नमः |
| 32 | ओं शोभनगरुडोत्सवमणिसौधापुरालयाय नमः |
| 33 | ओं कमललोचनाय श्रीमद्वैकुण्ठवरनायकाय नमः |
| 34 | ओं कल्याणरङ्गभूपालाय नगरीवालिवेदराजे नमः |
| 35 | ओं देवपरिमाणपुरमाधवाय सुरनायकाय नमः |
| 36 | ओं अम्बरे लोचनाम्भोजाय भुजङ्गशयनप्रियाय नमः |
| 37 | ओं मणिकूटसभानाथाय मङ्गळवरदेश्वराय नमः |
| 38 | ओं श्रीनिवासाय नारायणाय प्रवाहपुष्करप्रभवे नमः |
| 39 | ओं पार्थाशयपार्थप्रियसारथये कमलापतये नमः |
| 40 | ओं अम्बरनटेशरसरसिकमणिगोविन्दाय नमः |

| | |
|---|---|
| 41 | ओं अहीन्द्रपुरनायकाय देशिकवरदायकाय नमः |
| 42 | ओं तटाकभूतवेताळवन्दितेशाय त्रिविक्रमाय नमः |
| 43 | ओं सत्यव्रतहस्तिगिरिदेवाधिसुराय वरदाय नमः |
| 44 | ओं अष्टभुजशस्त्रधरकेशवाय गजवरदाय नमः |
| 45 | ओं वेङ्कटकविसम्भवयशोदीपप्रकाशिताय नमः |
| 46 | ओं कामासिकास्वयंव्यक्तयोगनृहरिसुन्दराय नमः |
| 47 | ओं भूमिमङ्गासमोपेतनीरस्थलजगत्पतये नमः |
| 48 | ओं पुनःपार्थस्य पौत्राय दूतवेषप्रकाशकाय नमः |
| 49 | ओं पार्वतीव्रतसन्त्रातृ चन्द्रशेखरवामनाय नमः |
| 50 | ओं नतबलिपरितुष्टाय पुनर्विक्रान्तदर्शकाय नमः |
| 51 | ओं वेगावेगपराजेतृकणिकण्णात्मकिङ्कराय नमः |
| 52 | ओं पद्मामणिगार्हमुनिप्रसन्नकरुणाकराय नमः |
| 53 | ओं पदविस्मितकमलवल्लीहृदयतस्कराय नमः |
| 54 | ओं कामाक्षीतपसा प्रीतवराहवरवल्लभाय नमः |
| 55 | ओं सङ्कल्पैकविशेषेण प्रवाळरागसम्युताय नमः |
| 56 | ओं विरजाख्यसरोपार्श्वपरेशनगरालयाय नमः |
| 57 | ओं जटायुमोक्षसन्तृप्तकृपाविजयराघवाय नमः |
| 58 | ओं मज्जननी सुधावल्लीवत्सलाय भक्तवत्सलाय नमः |

| | |
|---|---|
| **59** | ओं क्षेत्रज्ञशालिहोत्रस्य क्षेत्रस्थाय वीरराघवाय नमः |
| **60** | ओं सकुटुम्बवृष्णिनाथाय गीताबोधकसारथये नमः |
| **61** | ओं स्थानोपस्थानशयने त्रिधा तोयाद्रिसम्भवाय नमः |
| **62** | ओं सुताभिः कालवमुनेः नित्योद्वहमहोत्सवाय नमः |
| **63** | ओं महामल्लपुरक्षेत्रशयने स्वयमुत्सुकाय नमः |
| **64** | ओं घटिकामोक्षसन्दातृनरकण्ठीरवाय प्रभवे नमः |
| **65** | ओं साकेतनगरनाथाय सीताकान्तधनुर्धराय नमः |
| **66** | ओं गोमुखीतीरसङ्काशनैमिशारण्यमूर्तिमते नमः |
| **67** | ओं हिमाचलभृतिक्षेत्रपरात्परमपूरुषाय नमः |
| **68** | ओं देवप्रयागपुरुषनीलमेघतनूत्तमाय नमः |
| **69** | ओं अष्टाक्षरजन्मभूमिबदरीस्थलनायकाय नमः |
| **70** | ओं गण्डकीचक्रतीर्थस्थसाळग्रामविभवे हरये नमः |
| **71** | ओं मथुरानगरीजाताय गोवर्धनव्रतोत्सुकाय नमः |
| **72** | ओं बृन्दावनगोपीमुखसन्दीपकदिवाकराय नमः |
| **73** | ओं द्वारकापुरीरमणद्वापरयुगनायकाय नमः |
| **74** | ओं अहोबिलवनोल्लासनारसिंहनवात्मकाय नमः |
| **75** | ओं वरगुणवेङ्कटेशशेषशैलसुखावहाय नमः |
| **76** | ओं नवयोगीपुरीवासगजानुग्रहकल्पिताय नमः |

| | |
|---|---|
| **77** | ओं अम्बरीषमनोव्यापिव्यूहरूपसुदर्शिताय नमः |
| **78** | ओं कैरव्व्यवामनाकारकाङ्करातातनामकाय नमः |
| **79** | ओं हारीतमुनिपुङ्गवश्रीसूक्तिपदवन्दिताय नमः |
| **80** | ओं वक्षोविलासिनीशोभादर्शनात् भक्तपालकाय नमः |
| **81** | ओं नारायणसुधाकारश्रीकटिस्थानसंस्थिताय नमः |
| **82** | ओं हिमाचलतातान्वयाय ताम्रगिरिनिकेतनाय नमः |
| **83** | ओं कृत्यावधादिकरणात् सप्तर्षिपरिरक्षकाय नमः |
| **84** | ओं कर्णहाहृदये शान्तिं पुनःस्थापितवामनाय नमः |
| **85** | ओं श्रीवण्षद्वदनगरे भुजङ्गभोगसंस्थिताय नमः |
| **86** | ओं अनन्तपुरमन्दिरपद्मनाभसुरोत्तमाय नमः |
| **87** | ओं ताम्रपर्णीजलोद्वाहिगङ्गाहारविभूषिताय नमः |
| **88** | ओं श्रियःपतिसारपुरश्रीविहारभुजान्तराय नमः |
| **89** | ओं पदनूपुरपुण्याम्बुनम्बिराजत्रिविक्रमाय नमः |
| **90** | ओं श्रीवरमङ्गासहितश्रीतोतगिरिनायकाय नमः |
| **91** | ओं भूपालचोरमध्यस्थाय श्रीवैकुण्ठपुरस्थिताय नमः |
| **92** | ओं वरगुणवल्लीनाथाय विजयासननामकाय नमः |
| **93** | ओं आम्लिकानगरीवासनाभीलतिकपङ्कजाय नमः |
| **94** | ओं यागशालाबद्धतुलाचापमुक्तिप्रदायकाय नमः |

| | |
|---|---|
| 95 | ओं वेदसारसुतोद्वाहबालिकावननायकाय नमः |
| 96 | ओं अधर्मपिशुनक्षेत्रनित्यनिक्षेपवित्तकाय नमः |
| 97 | ओं मकराभरणसङ्कृष्टकर्णाय श्रीबेरनायकाय नमः |
| 98 | ओं वण् कुरुगूर् आदिनाथाय शठकोपसमर्चिताय नमः |
| 99 | ओं गोदावतारसन्तुष्टाय वटपत्रपुटेशयाय नमः |
| 100 | ओं लक्ष्मीस्पर्शनशीताङ्घ्रिस्थायिनारायणप्रभवे नमः |
| 101 | ओं अतिवृष्टिनिवृत्त्यर्थमेघसङ्गसुकल्पिताय नमः |
| 102 | ओं पर्वतवनोज्ज्वलितचित्तचोरातिसुन्दराय नमः |
| 103 | ओं काळमेघतनोर्मध्ये स्फुरद्वरदहस्तकाय नमः |
| 104 | ओं श्रीगोष्टीपुरसंयुक्तसौम्यनारायणाय प्रभवे नमः |
| 105 | ओं सेतुबन्धनसंतृप्तदर्भतल्परघूद्वहाय नमः |
| 106 | ओं सत्याचलगुहानाथसत्यमूर्तये श्रियःपतये नमः |
| 107 | ओं क्षीरसागरतरङ्गशेषतल्पितमाधवाय नमः |
| 108 | ओं नित्यसत्यसदानन्दविभूतिपरवैभवाय नमः |

## फलस्मृतिः

अष्टातीतशतं शौरेः अर्चामृततनुं स्मरन्।
अद्य मे सफलं जन्म पार्थसारथिसूनवे॥

नारसिंहपदत्राणनित्यसेवाधुरन्धरः।
नारायणयतीन्द्रो मे सन्ततं वसतां हृदि॥

॥ इति श्री दिव्याष्टोत्तरशतनामावलिः समाप्ता ॥